International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(6): 85-89
© 2016 IJSR
www.anantaajournal.com
Received: 23-09-2016
Accepted: 25-10-2016

मुकेश कुमार झा
शोधार्थी, साहित्य विभाग,
कामेश्वर सिंह दरभंगा संस्कृत
विश्वविद्यालय, दरभंगा, बिहार, भारत

Correspondence
मुकेश कुमार झा
शोधार्थी, साहित्य विभाग,
कामेश्वर सिंह दरभंगा संस्कृत
विश्वविद्यालय, दरभंगा, बिहार, भारत

# कालिदासग्रन्थवैशिष्ट्यम्

**मुकेश कुमार झा**

**प्रस्तावना**

महाकविकालिदासग्रन्थानां[1] सम्यगनुशीलनेन विविधप्रकारकाणि तद्वैशिष्ट्यान्यवलो-क्यन्ते। भवभूतिबाणभट्टादीतरकविग्रन्थेभ्यः[2] कालिदासग्रन्थेषु महदेकमन्तरं पाठकानां समक्षमभिलक्ष्यते। मनसि कस्या अपि रम्यकल्पनायाः समागमनेनान्यकवयस्तु तस्या विस्तृतवर्णनं कुर्वन्ति, किन्तु कालिदासः कतिपयेषु संयमितशब्देष्वेव तद्रेखाचित्रं निर्माय तत्रत्यरंजनक्रियाभारं पाठकानां सहृदयतोपरि निःक्षिपति (परित्यजति)। अतः कालिदासकाव्यानि'क्षणे[3] क्षणे यन्नवतामुपैति' इति रमणीयत्वनिकषे पूर्णतः सिद्धानि सफलानि च प्रतीयन्ते, एवं तदध्ययनानुशीलन समये पाठकानां हृदये न कदाप्युत्कण्ठाह्रासो रुच्यभावो वानुभूयते। उदाहरणार्थ वयं पश्यामो यन्मदनदाहानन्तरं वसन्तंदृष्ट्वा रतिदुःखं द्विगुणितं संजातम्। भावमिममभिव्यंजयितुं दुःखस्यानिवार्यप्रवाहसूचकमेकं[4] लघुवाक्यमेव प्रयुक्तवान्-'स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते।'किन्त्वेतादृशे एवैकत्रप्रसंगे भवभूतिना[5] विविधालंकारैरलंकृत्येकः पूर्णः श्लोको लिखितः[6]-

सन्तानवाहिन्यपि मानुषाणां दुःखानि सद्बन्धुवियोगजानि।
दृष्टे जने प्रेयसि दुःसहानि स्रोतः सहस्रैरिव संप्लवन्ते।।

मालविकाग्निमित्रनाटकस्य[7] संविधानकमुपस्थापयन् कविरिरावत्या अतिचमत्कारकं किन्त्वनावश्यकं नृत्यप्रसंगं महता संयमेन कौशलेन चोपेक्षितवान्। एतादृशप्रसंगैः कवेरुत्कृष्टसंयमः प्रतीयते प्रशंसनीया कलाभिज्ञता च।

रीतीनां मध्ये 'समग्रगणा वैदर्भी'इति नियमाद् वैदर्भी रीतिरेव सर्वश्रेष्ठा रीतिर्मन्यते। अस्या एव सर्वश्रेष्ठाया रीतेः प्राधान्यं कालिदासकाव्येष्ववलोक्यते।[8] पुराणानामनलंकृतास्वभावसरला कालिदासोत्तर- भाविनां[9] कवीनामलंकारभार-पीडिता च दुष्करा या शैली तयोर्मध्यमार्गगामिनी सहजसुन्दरा नान्यैस्सुलभा परिमितभूषणभूषिता कापि तस्य विशिष्टा शैली दृश्यते। यद्यपि च कालिदासकाव्येषु यत्र तत्र भासकाव्यव्यापी प्रसादगुणातिशयोऽपि लभ्यते, तथाप्यस्ति तत्रापि कोऽप्यद्भुतो विच्छित्तिविशेषः कलाचमत्कारश्च। अलंकारेषु प्रधानत उपमायमकानुप्रासार्थान्तरन्यासालंकारैःसुष्ठ्वलंकृतानि कालिदासकाव्यानि विद्यन्ते। रघुवंशमहाकाव्यस्य नवमः सर्गो यमकानुप्रासयोर्विलक्षणप्रयोगेन त्रिविधानां वृत्तानां च चमत्कारपूर्णनिर्माणेन तस्य

कृतहस्तत्वं दर्शयति। कालिदासकाव्येषु[10] शब्दालंकाराणामर्थालंका राणाम् च प्रयोगभारो नायं सम्यग् विभक्तो दृश्यते। अर्थसम्पदां विनाशश्च कदाचिदपि तेन निजकाव्येषु शब्दालंकारा[11] नायोजिताः।

एवं प्रकारेण सर्वथा कालिदास-काव्यानि बहूनामन्यकवीनां मार्गदर्शकायमानानि तावद्भूवन्। तथाहि, 'मेघदूतं वत्सभट्टिनानुकृतम्'सति तावदुक्ततरम्। मालविकाग्निमित्रमनुसरता हषेण नाटिकाद्वयं रचितम्। भवभूतिरात्मनो मालतीमाधवे कालिदासमनुयाति। दण्डिवामनादयोऽपि[12] प्राचीनालंकारिकाः तत्प्रबन्धेभ्यो बहुश उदाहरन्ति। आनन्दवर्धनाचार्यादर्वाक् च कालिदासो विशिष्ट लोकस्य प्रीत्यास्पदं भूत्वा बहुशोऽधीयते व्याख्यायते चेति सर्वविदितम्। शृंगार-करुण-रसयो रुत्कृष्टपरिपाकसमन्वितानि विविधप्रकार कविनोदपरिहासोपहासनिष्ठानि कालिदासकाव्यानि सर्वदैव नूतनानि चमत्कारपूर्णानि सर्वजनाकर्षकाणि च विद्यन्ते स्थास्यन्ति चेति।

कालिदासात्पश्चाद्वर्तिनोऽर्वाचीनालंकारिकामम्मटवि[13]श्वनाथादयः कालिदास्य-

काप्यभिख्या तयोरासीद् ब्रजतोः शुद्धवेषयोः।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।। (1–43)

कुमारसम्भवीये[14] पदे-'नवमालिकाकुसुमप्रेलता'इति च (प्रथमांके) शाकुन्तलीये वचने अश्लीलत्वदोषं च निर्दिशन्त, किन्तु यदि कालिदासस्य विशालग्रन्थसम्पत्त्या तेषां दोषाणां तुलना क्रियते तदा तेऽत्यल्पाः सारहीनाश्च प्रतीयन्ते। कवेर्ग्रन्थानां गुणसन्निपाते ते दोषा निमज्जन्ति तिरोहिता वा जायन्ते। अत एव कालिदासवाणीवर्णनसमये सहृदयो ग्रन्थकारसमालोचकः कश्चित्तत्र (कालिदासवाणीविषये)[15] 'निर्दोष'इतिविशेषणपद निःसंकोचं प्रयुक्तवान्। 'भरतचरित'काव्यस्य[16] रचयिता श्रीकृष्णकविः[17] निजग्रंथारम्भे कालिदासस्य भाषावैशिष्ट्यं वर्णयन्कथयति-

अस्पृष्टदोषा नलिनीव दृष्टा हारावलीव ग्रथिता गुणौघैः।
प्रियांकपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी।।[18]

एवं कालिदासीयग्रन्थानां सम्यगनुशीलनानन्तरं सुस्पष्टमिदं प्रतिभाति यत्तत्काव्यवैशिष्ट्य सर्वथानुपमवर्णनीयं चास्ति।[19]

ग. संस्कृत नाटके अभिज्ञानशाकुन्तलनाकस्य स्थानम्।[20]

रूपकमिदं कालिदासस्य प्रौढ़े वयसि विरचिता श्रेष्ठा कृतिरस्ति। संस्कृतनाट्यसाहित्ये[21] इदं सर्वाधिकप्रसिद्धं सर्वश्रेष्ठं च स्वीकृतमस्ति। यथोक्तं च-

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्।।

नाटकस्यास्य चतुर्थांके प्रकृतिमानवयोस्तादात्म्यसम्बन्धप्रदर्शनेन, कण्वमुनेः कारुणिकमार्मिकविलापेन, सरलसुमधुरभाषया तपोवन-दृश्यवर्णनेन चात्युत्कृष्टं वर्तते सद्यः प्रभावोत्पादकं च। अस्य प्रसिद्धनाटकस्यानुवादः संसारस्य प्रायः सर्वासु प्रमुखभाषासु प्राप्यते येनास्य प्रसिद्धिः लोकप्रियता च सुष्ठु प्रमाणिते भवतः। अत्र धोरोदात्तनायकोऽस्ति हस्तिनापुरराजो दुष्यन्तो नायिका च साध्वी सुन्दरी कण्वपुत्री शकुन्तला।[22] अनयोरेव प्रेमोपाख्यानमत्र नाटके प्रधानतया वर्णितमस्ति। शृङ्गाररसप्रधानं नाटकमिदं सर्वेषां पाठकानामभिनयप्रेक्षकाणाञ्च हृदयानि सहजमेवाकर्षयति। अत्रत्यं कथावस्तु मूलतो महाभारतस्यादिपर्वणः[23] शकुन्तलोपाख्यानाद् गृहीतमस्ति, किन्तु तस्मिन् स्वप्रौढ़कल्पना शक्तिवशात् कालिदासेन यत्र तत्र कृतं पर्याप्तपरिवर्तनमपि दृष्टिगोचरं भवति। अस्मिन् शाकुन्तलनाटके सप्तांकाः[24] सन्ति। तत्र सप्तस्वप्यंकेषु कण्वाश्रमे शकुन्तलादुष्यन्तयोर्गन्धर्वविवाहः[25], आश्रमरक्षणार्थं राज्ञो निवासस्तत्र प्रेमक्रीडा, परावृत्ते राजनि तीर्थयात्रातः समायाते च महर्षिकण्वे शकुन्तलाविदापनं, हस्तिनापुरे दुष्यन्तभवगतायाः शकुन्तलाया दुर्वासः शापवशात्प्रत्याख्यानं, तस्या मारीचाश्रमे यात्रा साद्धनिवासः, अंगुलीकाभिज्ञानाद्राजः पुनः स्मृतिलाभः इन्द्रसाहाय्यार्थं स्वर्लोकगमनं च, ततः परावर्तने पुत्रप्रियतमाभ्यां साक्षात्कार इत्येतावान् कथाभाग उपनिबद्धोऽस्ति। सौन्दर्यभावनायां, चरित्रचित्रणे चाभिज्ञानशाकुन्तलकविः[26] सर्वातिशायिस्थानमधिरोहतीति निर्विवादम्।

शाकुन्तलस्य भाषा प्रांजला परिमार्जिता सर्वथा परिष्कृता चास्ति। सा सर्वत्र प्रसादपूर्णा क्लिष्टताविहीना समासबाहुल्यहीना दूरान्वयदोषरहिता च वर्तते। मध्ये मध्ये च तत्र तादृशानां विविधलोकोक्तिविभूषितानां वाक्यानां प्रयोगः कृतोऽस्ति यः परमशिक्षाप्रदो मार्मिकश्च भूत्वा भाषायां भृशं सजीवतामानयति। अत्र कालिदासभाषावैशिष्ट्यमिदमपि दृश्यते यत्स सर्वत्र स्वपात्रानुकूलायाभाषायाः प्रयोगं कृतवानस्ति। यथा यज्ञभागाध्यापनकार्यसंलग्नस्य कण्वमुने-र्मुखेन स तादृशं वाक्यं निःसारयति यत्प्रसंगानुकूलं तन्मुनिप्रतिष्ठानुकूलञ्च विद्यते। शकुन्तलाया विवाहस्यानुमोदनं कुर्वन् स कथयति-"दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावकमुख एवाहुतिः पतिता, वत्से!

सुशिष्यपरिदत्ता विद्येवाशोचनीया संवृत्ता।" हस्तिनापुराय शकुन्तलाप्रस्थानान्तरं प्रियंवदानुसूये प्रति स पुनः कथयति- "गतवती वां सहधर्मचारिणो, निगृह्य शोकं मामनुगच्छतम्" इति। शकुन्तलानाटके प्रयुक्ता कालिदासस्य शैली नितान्तं सशक्ता विकसिता परमपरिष्कृता च दृश्यते। अत्र शब्दानां मधुरप्रयोगो रसानुकूलः प्रतीयते, लघुवाक्यान्यपि स्वतः पूर्णान्यवलोक्यन्ते। छन्दसां स्वरमाधुर्येण भाषायाः समाहारशक्तियोगेन व्यंजनावृत्तेश्च विधिवत्प्रयोगेन शाकुन्तलस्य शैलीखल्वनुपमरमणीयताविधायिकासंलक्ष्यते। प्रसंगागतभाव-स्यात्यल्पशब्देषु मार्मिकाभिव्यंजनं मार्मिकाभिव्यंजनं कालिदासशैल्या कालिदासशैल्या द्वितीय-मनुपमवैशिष्ट्यमत्र सुस्पष्टं प्रतिभाति। यत्र तत्र ध्वन्यातमत्वमपि तच्छैल्या अन्यतमं वैशिष्ट्यं कथयितुं शक्यते यद्द्वारा विभिन्नस्थलेषु स भविष्य कालिकघटनानां सूक्ष्मसंकेत कृतवानस्ति।

कालिदासो मूलतः शृङ्गारकविरस्तीति निःसन्दिग्धम्, परं शृंगारविषये तस्य दृष्टिकोण- न्यापेक्षया भिन्नमेवास्ति। शाकुन्तले सर्वदमनस्योत्पतिं दर्शयित्वा कविः पुत्रोत्पत्तिरहितः शृङ्गारः केवलं वासनाऽस्ति, तस्य लक्ष्यमस्ति –'प्रजायै गृहमेधिनाम्'। कालिदासमता प्रणय सार्थकता विवाहे, विवाहस्च च सार्थकता सन्तानोत्पत्तावस्ति। अस्यैवादर्शश्रृङ्गारस्य वर्णनं शाकुन्तले प्राप्यते। यद्यप्यत्र प्रधानो रसः शृङ्गारो विद्यते, तथापि वीरवात्सल्य-करुणाद्भुतशान्तादीनामन्येषां रसानामपि यथास्थानं सुविहितं, परन्तु ते सर्वे शृङ्गारांगरूपेण[27] संयोजिताः सन्ति।

शोभननाटकीयसंविधानक–कोमलकान्तपदावली-ध्वन्यात्मकोत्कृष्टवर्णनशैली- रसपरिपोषद्यतिरिक्तं शाकुन्तलनाटकीयं[28] सर्वाधिकं वैशिष्ट्यं तत्रत्यचरित्रचित्रे समुपलभ्यते। कालिदासस्य चरित्रचित्रणं यद्यप्यादर्शोन्मुखमस्ति, तथापि तत्सर्वथा स्वाभाविकं सजीवं चास्ति, तत्र कुत्रापि कृतिमताबाधो न भवति। यद्यपि शाकुन्तले कालिदासो बहूनां पुरुषपात्राणां स्त्रीपात्राणां च सृष्टिं कृतवानस्ति, तथापि स नायकनायिकयोः स्वभावचित्रणे एव मुख्यतो निजनाट्यकलायाः सर्वस्वं समर्पितं कृतमस्तीति सुस्पष्टम्।

## कालिदासस्य कृतय

सर्वसंस्कृतकवीनां नाटककाराणां चाग्रणी कालिदासो महाकाव्यगीतिकाव्य रूपकेतित्रिविधकाव्यस्य कर्ताऽऽसीत्। तत्कृतितया प्रसिद्धाऋतुसंहार मेघदूत-कुमारसंभव-रघुवंश-मालविकाग्निमित्र-विक्रमोर्वशीयाभिज्ञान शकुन्तलं चेति सप्तग्रन्था अस्माकं समक्षमुपलब्धाः सन्ति। एषु प्रथमद्वितीयौ ग्रन्थौ गीतिकाव्ये स्तः, तृतीयचतुर्थौ महाकाव्ये स्तः, अन्तिमास्त्रयो ग्रन्थाश्च नाटकानि सन्ति।[29]

तत्र ऋतुसंहारकाव्ये षड्डु सर्गेषु प्रतिसर्गमेकैकेषामऋतुनां वर्णनं दृश्यते। सम्यगनुशीलनेन गीतिकाव्यमिदं कालिदासेनोद्यत्तारूण्यकाले कदाचिद् विरचितमिति प्रतीयते। ग्रीष्मादारभ्य वसन्तपर्यन्तं षडपि ऋतवोऽत्र तरुणप्रणयदृशावर्णिताः प्रतिभान्ति। इह नानावृत्तमयैः 53 मितैः पद्यैः सर्वैरेकैकस्मिन् सर्गे एकैकः ऋतुरूपवर्णितोऽस्ति। कालिदासस्यास्या प्रारम्भिककृतावपि तस्य महती पर्यवेक्षण शक्तिः प्रसादगुणेन वर्णनचातुरी च परमालोक्यते। तदुक्तं मैकडानलमोहदयेन 'ए हिस्ट्री ऑफ संस्कृत लिटरेचर' नामके निजग्रन्थे 337 पृष्ठे 'तस्या प्रकृत्या सह संवेदना, पर्यवेक्षणस्याति सूक्ष्मा इक्षिका, भारतीयप्राकृतिकदृश्यानां च विशदवर्णनचातुरी यथा काव्येनानेन स्फुटीक्रियते न तद्ग्रन्थान्तरेण केनचिदिति। तथा च ए०बी०कीथमहाशयोऽपि कथयति तन्नामके एव ग्रथे-'यद्यपि प्रसादगुणोऽस्य काव्यस्य संस्कृतसाहित्यशास्त्रिणां[30] नाम हृदयावर्जको न भवति, तथापि स एव तु आधुनिककाव्यमर्मज्ञानां चेतश्चमत्कारकारको महान् हेतुः' इति काव्यमिदमुपस्तौति।

साहित्यमर्मज्ञैः महाकवेः कालिदासस्य सुप्रसिद्धखण्डकाव्यात्मक गीतिकाव्यत्वेन स्वीकृतमस्ति। अस्मिन् कश्चन कुबेरकोपनिर्वासितो मेघं दूतीकृत्य यक्षो रामगिरितो निजप्राणवल्लभानिकटे प्रेषितवानिति कथावस्तुद्वारेण भारतीयविविधस्थानानां अलकापुर्याश्चातिशयचमत्कार- पूर्णेन वर्णनेन यक्षप्रेमसन्देशश्चित्रितो दृश्यते।

असंशयमेतद्धि मेघदूतं कालिदासस्य प्रौढं गीतिकाव्यम्। कदाचित्स्वभर्तुः कुबेरस्य सेवायामपराधात् कश्चिद् यक्षः स्वामिना वर्षं यावत् स्वदेशाद् निर्वासितः सन् रामगिरिमधिवसति। अथ प्रावृण्मुखे मेघं कंचन उत्तरादिशमुच्चलितमुद्वीक्ष्य स तन्मुखेन स्वप्रेयस्यै सुखसन्देशं दित्सति। चातुःपुरस्सरं मेघं सम्बोध्य तत्प्ररोचनार्थं प्रथमं स पथां रमणीयकं वर्णयति येन तद्विवक्षितः पथां क्रमो व्यज्यते। स कथयति-सखे मेघ! मम शोभाशालिनीं पुरीमलकां समासाद्य स्वप्ने मामनुध्यायन्तीं मत्प्रियां कृपया विघ्नितमनोरथां मा करोतु। बत विप्रयोगसन्तापविच्छायचन्द्राननया क्षीणांगलतया च तया भवितव्यम्। अथ तस्यां प्रबुद्धायां भवाननुरागसन्देशं मामकमिमं तस्यै उपहरतु, अचिराद्भाविनं चावयोः संयोगं संसूच्य तां सांसान्त्वयतु इति।

मेघदूतकाव्यपरिशीलनेनेदं[31] वक्तुं शक्यते यदपूर्ववर्णननैपुणी वस्तु विकासनी च प्रतिभा कालिदासस्यानन्यसदृश्यो इति तावत्को निनुयात्। कालिदासग्रथितवस्तुनोऽभूतपूर्वत्वे तद् वचोर्भंग्याश्च असामान्यसौष्ठव शालिनीत्वो नास्ति कश्चित् सन्देहः। पूर्वमेघ इति,

उत्तरमेघ इति च खण्डद्वयेन समाप्ते काव्येऽत्र न्यूनातिन्यूनानि दशोत्तरशतं अधिकाधिकानि च विंशत्यधिकशत पद्यानि लभ्यन्ते। छन्दस्त्वत्र सर्वत्र मन्दक्रान्तैवास्ति।[32]

बहुतिथात्कालाद् मेघदूतस्य पठनपाठनयोर्महान् प्रचारो वर्तते। अस्य बह्व्योऽनुकृतयो टीकाश्च समुपलभ्यन्ते। प्रौढकल्पना-विलक्षण-भाषा-शैलीचमत्कारपूर्णालंकारप्रयोग-प्रकृति चित्रण-गेयत्वादिविविधदृष्ट्या[33] परमाह्लादकं नाम मेघदूतकाव्यमस्ति। भूगोलज्ञानार्थमपि मेघदूतस्य विशिष्टं महत्त्वं वर्तते। अत्र हि कालिदासकालिकस्य भारतवर्षस्य नानाभूगोलस्थितयो दृष्टिपथमवतरन्तीति।

## कुमारसम्भवम्

काव्यसम्पत्तिदृष्ट्या कालिदासविरचितस्य कुमारसम्भवस्य[34] विशिष्टं स्थानमस्ति। कुमारसम्भवमहाकाव्ये यद्यप्यष्टादश सर्गा उपलभ्यन्ते, तथाप्यादितोऽष्टमसर्गपर्यन्ता एव कालिदासविरचिता इति विदुषां सम्मतिः। स्वामिकार्त्तिकेयजन्मसम्बन्धात्काव्यस्यास्य 'कुमारसम्भवमि' ति नाम कृतमस्ति। अस्मिन् महाकाव्ये न केवलं दैत्यानाम्, अपितु जगति यत्किचन भव्यमस्ति तस्य सर्वस्य विनाशार्थं बद्धपरिकरं तारकं नामासुरं व्यापादयितुमवतीर्णस्य गौरीशंकरयोः सुतस्य कार्तिकेयस्य जन्मकथा निबद्धाऽस्ति। अत्र प्रथमे सर्गे आदौ देवगन्धर्वाणामपि क्रीडास्थलायमानस्य हिमवतो रमणीयं वर्णनमस्ति।

शिवस्य भवित्री अर्द्धांगिनी पार्वती एतादृशरमणीयपरिस्थितिषु जन्म लब्ध्वा निरुपमांगलावण्यं पुष्यन्ती यौवनमुपैति। सत्यामपि तस्यां यौवनावस्थायां 'मा नाम मत्प्रार्थनाऽनंगीकारेण शिवो ममावहेलां कुर्यात्' इति कृत्वा, न तत्पिता शिवमभ्यार्थयत्। यथोक्तम्–

'अभ्यर्थनाभंगभयेनसाधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे, इति। अथ पार्वतीपिता सख्यनुगतां पार्वतीं शिवमनुसेवितुमनुजानाति इति प्रथमः सर्गः[35]। 'अनन्तरं द्वितीयसर्गे सुरप्रार्थनानन्तरं 'पार्वत्यामुत्पन्नः शिवस्य सुतः तारकासुरं हन्तु प्रभविष्यतीति ब्रह्मणा संकेतः कृतः। तृतीयसर्गे पुनः क्रुद्धशिवद्वारा कामदहनवृत्तान्तो वर्णितोऽस्ति। ततश्चतुर्थे सर्गे कामपत्न्या रत्या विलापः, 'शिवपार्वत्योर्विवाहानन्तरं कामः पुनरुज्जीविष्यति' इति आकाशवाणीद्वारा संकेतश्चोपवर्णितः। पंचमसर्गे पुत्ररुग्रतपस्याद्वारा पार्वत्या शिवो वशीकृत इति कविना निर्दिष्टमस्ति। ततः सप्तर्षिद्वारा षष्ठसर्गे तयोर्विवाहविषये पार्वत्याः पितुर्मातुश्च सर्वथा समर्थनं समासादितम्। तदनन्तरं महता समारोहेण शिवपार्वत्योर्विवाहविधिः सम्पन्न इति सप्तमसर्गीया कथा विद्यते। अथाष्टमसर्गे कालिदासकामसूत्रानुसारेण नवदम्पत्योः प्रेमकिल सरसालंकृतभाषामाध्यमेन वर्णितमस्ति। अष्टम सर्गोत्तरसर्गेषु ग्रन्थनाम्ना सूच्यमानात् कुमारजन्मनः कथापि वर्णिताऽस्ति। अन्ते पार्वत्या शिवेन जातः स्कन्दो यौवनेऽतुलबलविक्रमशाली भूत्वा तारकासुरं जघान इति।

अस्मिन् महाकाव्ये शंकर-पार्वती-मदनीनां विविधचेष्टानां वर्णने कविः सम्पूर्णशक्ति-व्ययं कृतवानस्ति। अत्र नायकनायिकयोः शंकर-पार्वत्यो-रसाधारणव्यक्तित्वं कविना निर्दिष्टमस्ति। अनयोरेकः (नायकः) त्रैलोक्यस्य पिताऽस्ति अपरा (नायिका) च जगन्माता। मदनदहनानन्तरमत्र वर्णितो हृदयद्रावको रतिविलापः काव्यरसिकानां कृते परमाकर्षकोऽस्ति। काव्येऽस्मिन् प्रधानरसः शृङ्गारो वर्तते करुणशान्तरसौ च तत्संख्यकौ स्तः। कथाऽस्यास्ति पौराणिकी यत्र शिवपुराणस्कन्दपुराणयोः स्पष्टप्रभावः संलक्षितो भवति। काव्यस्यास्य भाषा सरला सालंकारा वर्तते। 'उपमा कालिदासस्य'[36] इत्येतस्य प्रसिद्धकथनस्य प्रबलसमर्थक काव्यमिदमस्तीति निःसन्दिग्धम्।

## रघुवंशम्

रघुवंशनामधेयं[37] कालिदासस्य सर्वश्रेष्ठं महाकाव्यमस्ति यत्र दिलीपादारभ्याग्निवर्ण पर्यन्तेक्ष्वाकुवंशीयानां चरितानि वर्णितानि सन्ति। रघुवंश महाकाव्ये एकोनविंशतिसर्गाः सन्ति। अस्मिन् कालिदासकवित्वस्य चरम उत्कर्षो दृष्टिपथे समायाति। एकोनविंशतिसर्गनिबधं महाकाव्यमिदं कालिदासस्य चरमा कृतिर्नूनमस्ति। रामायणे पुराणेषु च प्रसिद्धैव कथा यद्यप्यत्र वर्णिता, तथापि कालिदासस्य कवि-प्रतिभया तया यदभिनवं रूपं धृतं तस्य किमु वक्तव्यम्।

`अत्रादौ सिंह-दिलीपकथा, मध्ये (षष्ठसर्गे) इन्दुमतीस्वयंवरकथा[38], अजविलापकथा, श्रवणकुमारोपाख्यानकथा च नवमोत्तरेषु षड्वर्गेषु सविस्तरं रामकथा, षोडश-सप्तदशसर्गे कुशचरित-कुशतनयचरितकथा, अन्तिमसर्गद्वये च तदुत्तरभाविनां नानानृपाणां कथा पूर्णा इव लक्ष्यते येनेदं स्पष्टं प्रतिभाति यदकाले कालकवलितः कविः कथापूर्तिं कर्तुं नापारयत्।

रघुवंशकाव्यमिदमधिकृत्य प्रसिद्धः पाश्चात्त्यो विद्वान् हिलब्रण्टमहोदयो निजकालिदासनामकग्रन्थे "रघुवंशस्यान्तिमं सर्गद्वयं न कालिदासकृत मित्यकल्पयत्" यत्सत्यम्, नानयोः सर्गयोस्तादृशो रसभावोंत्कर्षस्तादृशं वा शब्दार्थसौष्ठवमवलोक्यते, तथापि नैतावता तौ कालिदासकृतितया व्यपदेष्टुं शक्येते। नाद्यावधि पण्डितान्तरं तथा मतं प्राकाशयत्। अधिकाधिक 'नात्र कालिदासस्यासामान्या कविकलादृक्पथमवतरति" इत्येव तावदेव एतद्विषये वक्तव्यम्।

रघुवंशं कालिदासस्यात्यन्तं प्रसिद्धं महाकाव्यमस्ति। अस्य भाषाऽतिसरलाऽस्ति येन साधारणसंस्कृतज्ञोऽप्याबालवृद्धोऽस्य रसास्वाद कर्तुं शक्नोति। अस्यैकस्यैव काव्योपरि प्रायस्त्रयस्त्रिंशट्टीकाः समुपलब्धाः सन्ति। अनेनैव काव्यस्यास्य लोकप्रियताया अनुमानं कर्तुं शक्यते। अस्मै महाकाव्याय काव्यसाहित्यस्यामूल्यरत्नसंज्ञादाने न काप्यत्युक्तिरिति विदुषां मतम्। यद्यपि महाकविकालिदासो नैकेषां काव्यनाटकानां रचनां कृतवानस्ति, किन्तु संस्कृतस्य बहवो ग्रन्थकाराः सुभाषितकाराश्च तस्योल्लेखं रघुकारनाम्नैव कृतवन्तः सन्ति। अनेन रघुवंशस्य लोकप्रियताया उत्कृष्टतायाश्च सम्यक् संकेतो भवतिं काव्येऽस्मिन् प्रसादगुणस्य, वैदर्भीरीतेः, उपमा-रूपकोत्प्रेक्षाव्यतिरेकार्थान्तरन्यास- विरोधादीनामलंकाराणां च मनोरम - प्रयोगाः सर्वेषां हृदयानां सहृदयं भृशमाकर्षयन्तीति सर्वविदितम्।

यद्यपि कालिदासो मुख्यतया श्रृंगाररसकविः कथ्यते, किन्तु स निजकाव्यनाटकेषु प्रायः सर्वेषां रसानां समावेशं कृतवानस्ति। अत्र रघुवंशमहाकाव्ये श्रृंगाररसेन सह प्रसंगानुसारं कालिदासेन वीरकरुण शान्तादिरसानामपि चमत्कारपूर्णः सन्निवेशः कृतोऽस्तीति।

संस्कृतवाङ्मये[39] कालिदासस्य तथा श्रव्यकाव्यान्यतिप्रसिद्धानि सन्ति तथैव तस्य दृश्यकाव्यान्यपि। तन्नाटकेषु “मालविकाग्निमित्रम्।”

## सन्दर्भ ग्रन्थ सूची


1. महाकविकालिदासग्रन्थानाम्
2. भवभूतिबाणभट्टादीतरकविग्रन्थेभ्यः
3. कालिदासकाव्यानि
4. दुःखस्यानिवार्यप्रवाहसूचकमेकं
5. भवभूतिना
6. कालिदास विद्यालंकार
7. मालविकाग्निमित्रनाटकस्य
8. कालिदासकाव्येष्ववलोक्यते।
9. कालिदासौत्तरभाविनां
10. कालिदासकाव्येषु
11. शब्दालंकारा
12. दण्डिवामनादयोऽपि
13. मम्मटकृतकालिदास अलंकार
14. कुमारसम्भवीये
15. कालिदासवाणीविषये
16. ‘भरतचरित’ काव्यस्य
17. श्रीकृष्णकविः
18. कालिदास अलंकार
19. कालिदास वैशिष्ट्य
20. अभिज्ञानशाकुन्तलम्
21. संस्कृतनाट्यसाहित्ये
22. अभिज्ञानशकुन्तलम्
23. महाभारतस्यादिपर्वणः
24. शाकुन्तलम् नाटके
25. शकुन्तलादुष्यन्तयोर्गन्धर्वविवाहः
26. अभिज्ञानशाकुन्तलम्
27. श्रृङ्गाररूपकम्
28. शाकुन्तलनाटकीयं
29. साहित्य दर्पणेः तृतीयचतुर्थाे महाकाव्ये
30. संस्कृतसाहित्यशास्त्रिणां
31. मेघदूतकाव्यपरिशीलनेनदं
32. मन्दक्रान्तैवास्ति।
33. साहित्य दर्पणेः अलंकार प्रयोग
34. कुमारसम्भवस्य
35. कुमारसम्भवे प्रथमद्वितीयसर्गे
36. कालिदासस्य अलंकार उपमा
37. रघुवंशनामधेयं
38. इन्दुमतीस्वयंवरकथा
39. संस्कृतवाङ्मये कालिदास